Shodhshauryam, International Scientific Refereed Research Journal
Available online at : www.shisrrj.com
OPEN ACCESS
© 2023 SHISRRJ | Volume 6 | Issue 6
ISSN : 2581-6306
doi : https://doi.org/10.32628/SHISRRJ

# संस्कृतवाङ्मये मानवाधिकार:, सामाजिक समावेशनं च

डॉ0 ऋतु शुक्ला
असि0 प्रो0 संस्कृतविभाग:, महाराजा बिजलीपासी राजकीय स्नातकोत्तर महाविद्यालय:, आशियाना, लखनऊ,उत्तरप्रदेश:।

**Article Info**

**Publication Issue :**
November-December-2023
Volume 6, Issue 6

**Page Number :** 145-150

**Article History**
Received : 02 Dec 2023
Published : 21 Dec 2023

**शोधसारांश:**–लौकिके वैदिके च वाङ्मये मानवीयमूल्यानां शृंखला एव उपलभ्यते। मानवस्य पुरातनपरमपरया, संस्कृत्या च विच्छेद: जात:, अत: एव अद्य 'Human rightsand inclusion' इति विचार: आरब्ध:। अत्र स्वामी दयानन्द सरस्वती वर्याणां वचनों स्मर्यते। 'वेदों की ओर लौटे' अर्थात् 'वेदमार्गे आगच्छन्तु' इति। तद्वत् इदानीम् अस्माभि: वेदानाम्, उपनिषदाम्, गीताया:, संस्कृतसाहित्यानां मार्गे गन्तव्यम्। मानवीयमूल्यानां महत्वम् अवगम्य जीवने आत्मसात्करणीयम्। यदि मानवीयमूल्यानां ज्ञानं सम्यक् भवति चेत् वयं मानवाधिकारे समाजिक समावेशने च स्व उद्देश्यं प्राप्तुं शक्नुम:। यतोऽहि अस्माकं भारतीय संस्कृते: उद्घोष: **'वसुधैव कुटुम्बकम्', 'सर्वे भवन्तु सुखिन: सर्वे सन्तु निरामया:, सर्वे भद्राणि पश्यन्तु, मा कश्चित् दु:ख भाग् भवेत्** ' आदय: प्राणीनां पक्षिणां सर्वेषां चेतनानां समावेशनस्य महत्वं प्रतिपादयन्ति। अस्माकं संस्कृति: दायित्वेषु बदन ददाति। अत: यदि प्रत्येकं मानव: स्व दायित्वं सम्यक् साधयति चेत् सर्वेषां कल्याणं भवति, वयमपि मानवाधिकाराणां प्राप्तौ सक्षमा: भवाम:।

**मुख्यशब्दा:** – संस्कृतवाङ्मय:, मानवाधिकार:, सामाजिक:, वेद:,मानव:, समावेशनम्, गुणा:।

ईश्वरेण निर्मितेऽस्मिन् सृष्टिप्रपञ्चे मानव: एका उत्कृष्टा सुन्दरी च सृष्टि: वर्त्तते। इदानीन्तनकाले मानवस्य विभिन्नाधिकारिक विचारा: समाजे दृश्यन्ते। तेषु प्रमुखौ भवत: मानवाधिकार: सामाजिक समावेशनमिति उभौ। एतयो: विश्वस्य दृष्टि: केन्द्रिता वर्त्तते। अस्या: अवधारणाया: उद्देशन्तु समाजस्य उन्नतये, मानवस्य योगदानं भवतु इति। मानवस्य जीवनं सभ्यं, सुन्दरं च भवेत्। प्रसिद्ध: संविधानविधायक: सुभाषकष्यप: अभिप्रेति – "मानवाधिकार: पुरुषाणां, महिलानां च जन्मत: लभ्यते। ते मूलभूता: , सर्वेभ्य: अपि भवन्ति" संयुक्त राष्ट्र मानवाधिकार सङ्घटनाया: मते तु, ते अस्मासु मानवशरीरे एव मिलिता: भवन्ति, तैर्विना वयं सामाजिक जीवने जयं प्राप्तुं न शक्नुम: इति ।

मानवाधिकारेण सह सामाजिक समावेशनम् इत्यपि विचार: अस्ति। सत्यं पूरकरूपेण दृष्टिपथे आयाति। अस्य तु संस्कृतवाङ्मये महत् स्थानं वर्तते। आस्ट्रेलिया देशस्य दार्शनिक: जे. एल्. मैकी वर्य: तस्य ' Ethics inventing right and wrong' पुस्तके कथयति यत् " वयं सर्वे मानवा: , तथापि अस्माभि: मानवै: भाव्यम् " अर्थात् अस्मासु मानवोचितगुणा: भवेयु:, अन्येभ्य: अपि गुणा:, सौहार्दभावा: प्रकटनीया: , मानवोचित व्यवहार: करणीय: इति तस्य

**Copyright © 2023 The Author(s):** This is an open-access article distributed under the terms of the Creative Commons Attribution **4.0 International License (CC BY-NC 4.0)** which permits unrestricted use, distribution, and reproduction in any medium for non-commercial use provided the original author and source are credited.

आशय:। स: आस्ट्रेलियादेशस्य आचार्यस्य (प्रोफेसर्स), नीतिशास्त्रस्य, दार्शनिकस्य Peter singer इत्यस्य विषयम् उद्धृत्य वदति यत्, Peter singer वर्यस्तु मानवाधिकार: तथा वर्तते, तद्वत् वृक्षाणां, सस्यानां, शिलानामपि अधिकार: वर्तते इति अभिप्रेति, एतत्तु मैकी महोदयेन Singer विषये कथितम् । Singer मते लोके प्राणिनां चत्वार: स्तरा: सन्ति ।

प्रथमस्तर: – जडजगत् – पाषाण:, पर्वता: च ।

द्वितीयस्तर: – चेतन: – वृक्ष:, सस्यानि ।

तृतीयस्तर: – जीवितजगत् – पशु – पक्षिण: ( चैतन्ययुक्ता: ) ।

चतुर्थस्तर: – जीवितम्, आत्मा,चेतनायुक्तम् – मानव:, (मानवोचितप्रवृतिभि: युक्ता:, आत्मचेतनसंयुक्ता:) ।

अत: Peter singer सदृश दार्शनिकानां मते न केवलं मानव: अपि तु पर्वतवृक्षप्राणिपक्षिण: अपि सामाजिक समावेशने अन्तर्भवन्ति । आस्ट्रेलियादेशस्य सामाजिक समावेशनस्य बोर्ड् ( Board) अध: प्रदत्तरीत्या सामाजिक समावेशनस्य व्याख्यानं प्रददति ।

1. ज्ञानम् – ( शिक्षणं प्रशिक्षणञ्च )

2. कार्यम् – ( उदा – प्रतिनित्यं क्रियमाणम् ऐच्छिक उद्योगम् ,स्व कार्येण मानव: स्व परिवारं रक्षति, तस्य उत्तरदायित्वं स्वीकरोति )

3. व्यस्त: – ( उदा – जनानां मेलनम्, स्थानीय उत्सवादि कार्यक्रमेषु भागग्रहणम् । स्थानीय सांस्कृतिक, क्रीडादिषु मेलनम् )

4. ध्वनि: – ( तस्य या: समस्या: भवन्ति, तासां विरोधकरणम् ) [1]

यूनेस्को संस्थया सामाजिक समावेशन सम्बद्धा: नैका: परिभाषा: आकरिता: । तस्या: अनुसारेण " अस्मिन् समावेशे समाने सर्वेऽपि अन्तर्भवन्ति, सर्वान् मेलयित्वा स: समान: इति कथ्यते । प्रत्येकं व्यक्ते: अपि तत्र सक्रिय पात्रं भवति । एतादृशी समाज समानता, मानवाधिकार: स्वतन्त्रता च मौलिकमूल्येन सह सहिष्णुता एवं विविधता सिद्धान्तमपि आधारीकृत्य तिष्ठति ।[2]

अस्माकं सम्पूर्णसंस्कृतवाङ्मयं दर्शनशास्त्रेषु अध्यात्मिक विचारेषु एव सन्निविष्टं नास्ति। तस्मिन् वाङ्मये मानवीयता सम्बद्धविचारा: अपि लभ्यन्ते। ब्रह्मसम्बन्धी रहस्यानां वर्णनं विहाय, उन्नत आचरणम्, उत्कृष्टगुणा:, अतिवादिताया: परित्याग:, इत्यादय: विचारा: अपि अस्मिन् वाङ्मये दृश्यन्ते। एवमेव परोपकार:, दया, दानम्, विवेक: इत्यादि मानवीयमूल्यानां समावेशनमेव संस्कृतवाङ्मयं, विश्ववाङ्मयेषु स्थानं प्राप्नोति। संस्कृते वेदान्ते उपनिषदि वा जीवनक्रम:, जीवनतत्वानि, जीवनस्य सोपानानि इत्यादि लोककल्याणकारिण: विचारा: उपलभ्यन्ते। अमरकोशकार: उपनिषत् पदस्य अर्थं ' धर्मे रहस्यमुपनिषत् स्यात् ' इति लिखति । अर्थात् उपनिषत् शब्दस्य अर्थ: धर्म: एव रहस्यम् इति। परंब्रह्मा, अनेक स्वरूपा:, जीवात्मा परमात्मात्मादि भेद:, ब्रह्मसाक्षात्कारस्य उपाया: इत्यादि अनेका: दार्शनिका: आधिदैविका: सिद्धान्ता: संस्कृतवाङ्मये लभ्यन्ते, तै: सह मानवतावादी सिद्धान्तानां निरूपणं, प्रतिपादनञ्च वाङ्मयेऽस्मिन् लभ्यन्ते। उपनिषदां विषया: उपरिष्टात् पश्याम: चेत् आध्यात्मिका: प्रतिभान्ति, तथापि गूढतया तत्र लौकिक जीवनोपयोगी विचारा: प्राप्यन्ते। **"तेन त्यक्तेन भुञ्जीत,** मा विद्विषावहै"[3] इत्यादि वचनानि जगत: सुखार्थं, हितार्थम् रक्षणार्थमपि अनिवार्याणि, अत्यवश्यकानि च।

ईशावास्योपनिषद: प्रथममन्त्र: एव लोककल्याणाय सन्देशं प्रददति। तत्र सम्पूर्णसंसारस्य वस्तूनां त्यागपूर्वकम् उपभोगस्य सन्देश: प्रदत्त:। धनस्य नश्वरतां निरूपयन् तस्मिन् वित्ते अत्यासक्ति:, लोभ: न करणीय: इति उद्बोधयति।[4] अन्यत्र मानवेन निष्कामभावेन कर्म कुर्वन् शतवर्षाणि जीवेत् इति उल्लिखितमस्ति। अनया भावनया कर्मकरणेन मानवस्य कर्मफले इच्छा न भवति।[5] उपनिषदि एकत्र महापुरुषाणां वर्णनसमये मानव: सर्वेषु जन्तुषु वस्तुषु वा ब्रह्माणमेव पश्येत्, कदापि घृणा,

अन्यस्मिन् द्वेषः न करणीयः इति सन्देशः उपलभ्यते।[6] अत्र अप्रत्यक्षरूपेण प्राणिनां प्रति घृणा, द्वेषस्य वा उपदेशः दत्तः। इत्थम् ईशावास्योपनिषदि वर्णिताः, त्यागपूर्वक उपभोगः, निष्काम कर्म, द्वेष–घृणादि राहित्यमित्येते विचाराः सम्पूर्णमानव जगतः कृते मानवीयमूल्यानां निदर्शनं कुर्वन्ति।

कठोपनिषदि अपि एतादृश सन्देशाः उपलभ्यन्ते। इयं उपनिषत् आदावेव जीर्ण–शीर्ण–नष्ट वस्तूनां दाने निषेधः इति प्रतिपाद्य अस्मान् अधर्मात् रक्षति।[7] अस्यां यम–नचिकेत संवाद द्वारा लोककल्याणकारिणां तथ्यानां निरूपणं कृतम्। नचिकेतसे भोग्यवस्तूनां क्षणिकत्वं निरूप्य उच्यते, भोग्यवस्तूनि लाभदायकं न, तानि मनुष्यस्य इन्द्रियम् आकृष्य हरन्त्येव।[8] अतः अस्माभिः नश्वरपदार्थातनां एतादृशानाम् इच्छा न करणीया। नचिकेतसः अयमभिप्रायः जनान् नश्वरपदार्थब्यामोहात् रक्षति, एवं संसारिकपदार्थानां नश्वरतां बोधयति। धनम्, भोग्यवस्तूनि च यावदावश्यकं तावदेव भवेत्, आवश्यकतानुसारं तस्य उपयोगः करणीयः, अनुचित सङ्ग्रहः न करणीयः इति शिक्षाम् उपनिषत् प्रददति।

**"न वित्तेन तर्पणीयो मनुष्यः"**[9] इति कठोपनिषदः वाक्यं मनुष्यस्य सन्तोषस्य प्राप्तिं निरूपयति। धनेन मानवः कदापि तृप्तः न भवति। स्व प्रतिनित्य उपयोगाय यावत् धनम् आवश्यकं तावदेव अर्जनीयम्। सन्तोषः एव परमसुखम्, सन्तुष्टः जनः अन्यव्यक्तेः हितमेव वाञ्छति, तस्मिन् चिन्तनशीलः भवति इत्येवं कठोपनिषदः सन्देशः ऋषीणां मानवतावादि चिन्तनस्य पोषकः भवति।

मुण्डकोपनिषदि ब्रह्मप्राप्तेः साधनं निरूपयन् कथितं यत् सर्वप्रकाश दोषरहितः प्रयत्नशीलः साधकः एव विशुद्धप्रकाशमय परंब्रह्म परमात्मं प्राप्नोति। सर्वदा सत्यभाषणम्, तपः, संयमः, स्वार्थत्यागः एवं ब्रह्मचर्यस्य पालनम् इत्यादीन् निरन्तरं पालयति चेदेव ब्रह्मज्ञानं शक्यते।[10] इदम् उपनिषत् अस्मभ्यं सत्यभाषणार्थम्, स्वार्थत्यागार्थम्, परमार्थरतः भवितुं च आदिशति। पुनश्च भोगेषु आसक्तः, मिथ्याभाषी, स्वार्थपरायणः, अविवेकी जनः ब्रह्मज्ञानार्थं असमर्थः एव । सत्यस्यैव जयः भवति, न तु मिथ्यायाः अतः सत्यमेव वक्तव्यमिति उपनिषदः सारः । ये जनाः मिथ्याभाषणेन, दम्भेन, कपटमार्गेण च उन्नतिं प्राप्तुम् अभिलषन्ति ते अवश्यं निराशाः सन्तः कष्टे पतन्ति।[11] एवं मुण्डकोपनेषत् अपि मिथ्याभाषणम्, दम्भः, कपटत्वम् इत्यादीन् विहाय सत्यकथनम्, तपः, निस्वार्थभावनादि सद्गुणानां पालने सर्वान् प्रेरयति, दुर्गुणयुक्तान् जनान् दूषयतिश्च ।

तैत्तरीयोपनिषदि अपि सत्यभाषणम् करणीयम्, कष्टकाले असत्य भाषणं न करणीयम्, हास–परिहासादिभिः वाण्याः शक्तिं व्यर्थं न कुर्यात्, धर्मपालने प्रमादः न करणीयः, आलस्यवशात् धर्मस्य उपेक्षा न करणीया इत्यादयः सन्देशाः प्रदत्ताः सन्ति।[12] एवमेव उत्तमशास्त्रम्, शिष्ट्पुरुषानुमोदित अचरणानाम् अनुकरणं सर्वैः कुर्युः इत्यपि अस्यामुपनिषदि दृश्यते । गृहागतम् अनिधिं सत्कुर्यात्, अर्घ्य, दान,आसनादि, अनिधि सेवा करणीया।[13] निष्कामभावेन कर्म कुर्यात्, एवमेव स्वयमेव कार्याणां कर्ता मत्वा आत्मप्रशंसा न करणीया इत्यादयः योग्याः विचाराः तैत्तरीयोपनिषदि निरूपिताः सन्ति । वर्तमानकाले समाजे मिथ्याचरणम्, दम्भः, स्वार्थपरता, अभिमानः, अहङ्कारः इत्यादयः दुर्गुणाः सर्वत्र व्याप्ताः दृश्यन्ते । अस्यां स्थितौ इयम् उपनिषद् सत्यभाषणम्, धर्मपालनम्, अतिथिसेवा, अभिमानहीनता, निष्कामकर्मादि आचरणार्थम् उपदेशं दत्वा समाजे मानवीयमूल्यानां रक्षणार्थम् पुनीतकर्माणि कुर्वन्ति उपनिषदः।

बृहदारण्यकोपनिषदः दमनम्, दया, दानम् इति द त्रयं सर्वत्र प्रसिद्धम्। अस्यां प्रजापतिना भोगप्रधानदेवानाम् इन्द्रियाणि, दमनं कर्तुम्, सङ्ग्रहप्रधान भोगसामग्रीणां दानं कर्तुम्, प्रत्येक प्रधान राक्षसानां जीवे दया कर्तुम् च उपदेशः प्रदत्तः।[14] अतः मानवेभ्यः दमस्य, दानस्य, दयायाः महत्वं ज्ञापयित्वा मानवकुलस्य कल्याणाय सन्देशं प्रददति ।

केनोपनिषदः अपि नैके सिद्धान्ताः एतादृशा मानवतावादी अवधारणानां पोषकाः सन्ति । छान्दोग्योपनिषदि अपि मानवतावादि तत्वानाम् अंशाः दरीदृश्यन्ते। धर्मस्य तिसृषु स्कन्धेषु प्रथम स्कन्दः यज्ञम्, द्वितीयः अध्ययनम्, तृतीयः स्कन्धः दानमिति स्वीक्रियते।[15] दानस्य प्रवृत्या मनुष्यस्य भौतिक हितानां पूर्तिः, पारलौकिकमङ्गलस्य प्राप्तिः अपि जायते। एवं

छान्दोग्योपनिषद् न केवलं एकस्मै अपि तु मानवसमुदायाय एवं उपयोगी,अस्माकं हितार्थं योग्या: ग्रन्थ: वर्तते। अनेन मानवीयमूल्यानां ज्ञापनमार्गेण समाजे समरसता, बन्धुत्वभावना, परस्परमैत्री, समत्वभावना इत्यादीनां प्रसारस्य प्रयास: कृत:।

उपनिषत्सु मन्त्रद्रष्टाराणां मुनीनां संकल्पस्तु सम्पूर्णप्राणिकुलं मैत्रीपूर्ण भावनया द्रष्टव्यमिति । एक: अन्यं मनुष्यं रक्षेत् परस्परं द्वेष: न स्यादिति । अत: उपनिषत् साहित्येषु न केवलं ज्ञानस्यैव प्रकाशनं कृतं अपि तु लोकोद्धारार्थम् उपादेयानां योग्यानां सिद्धान्तानां प्रतिपादनमपि कृतम् । औपनिषत् सिद्धान्ता: कस्मैचित् वर्गविशेषाय, जातिविशेषाय, व्यक्तिविशेषाय व मा भवन्तु । मानवस्य सम्पूर्ण सांस्कृतिक, चारित्रिक परिष्कारस्य ते सिद्धान्ता: भवेयु: । अत्र मानवानां मध्ये कोऽपि भेद: न दर्शित: । उपनिषदां द्वारा सत्यभाषणम्, दानम्, परोपकार:, धर्मपालनम्, मैत्री, अतिथिसत्कार: इत्यादीनां नीति: विवेक: इत्यादीनां गुणानां महत्वप्रकटनपुरस्सरं मानवीयगुणानां तस्य सिद्धान्तानां च प्रकटनं कृतं वर्तते। व्यक्तिगत हितस्य सीमामुल्लङ्घ्य सम्पूर्ण मानवजाते: कल्याणमेव वेदान्तशास्त्रस्य मुख्यं प्रयोजनम् उद्देशश्च। एवम् महाभारते **'आनृशंस्य परो धर्म:'** इत्युक्तम् । अर्थात् दया- समता च परमोधर्म: इति । अद्यतन समाजे एतेषां मूल्यानाम् अभावकारणेन नैकानि दुष्कृत्यानि सम्भवन्ति ।

एवमेव पञ्चमवेदे श्रीमद्भगवद्गीतायामपि नानाप्रकाराणाम् उपदेशा: उपलभ्यन्ते । श्रीमद्भगवद्गीतया समाजाय धार्मिक सहिष्णुताया: शिक्षा प्रदत्ता । सा अद्यापि प्रासङ्गिकी, अनुकरणीया च वर्तते । सप्तमाध्याये भगवानेव वदति, यो भक्त: कं देवं श्रद्धया पूजयति, तं भक्तं, तस्य श्रद्धां च दृढं करोम्यहमिति। गीतायां प्रतिपादित निष्कामकर्म, भ्रष्टाचारेण विना कर्मकरणम् इत्यादि विचारा: अद्यापि उपयुक्ता: वर्तन्ते। गीता द्वारा प्रतिपादितविचारेषु लोककल्याणम्, लोकसङ्ग्रहस्य सिद्धान्ता: च अन्यतमा:। ते विचारा: सम्प्रति अत्यावश्यका: भवन्ति । तेषां पालनाय भगवान् आदिशति, तथापि मानव: स्वार्थं, स्वाधिकारञ्च चिन्तयति । स्व कर्तव्येषु – दायित्वेषु च मानवस्य रुचि: न भवति, अत एव मानवाधिकार: सङ्कटे निमज्जति। **' स्वकर्मणा तमभ्यार्थं सिद्धिं विन्दति मानव: '** इति वचसा गीतायां स्वकर्तव्यपालनमेव देवपूजासमानमिति भगवता उक्तम् । अस्माभि: स्थितप्रज्ञै: भाव्यम् । अर्थात् कष्टे-नष्टे, सुखे-दु:खे, शुभे-अशुभे, प्रिये-अप्रिये च समानतया, तटस्थरूपेण भवितव्यम् । एता: स्थितय: ईश्वराधीना: इति मन्तव्यम् । यदि मानव: जवने घटित प्रतिकूल पिरिस्थितय: ईश्वराधीना: इति मत्वा संयमितं, धैर्यपूर्वकं व्यवहरति चेत् तस्मै उद्विग्नता, शोक:,निराशादय: प्रभावं न जनयन्ति ।

**'आत्मवत् सर्वभूतेषु य पश्यति स पण्डित: ', 'आत्मन: प्रतिकूलानि परेषां न समाचरेत्',' वसुधैव कुटुम्बकम्'** इत्यादि वचनानि मानवताया: उत्कृष्टत्वं निगदन्ति। साम्प्रतं मानवाधिकाराणां चर्चा समये स्त्रिय: वञ्चिता: इति मत्वा तासां मुख्यधारायां समावेशनस्य योजना कृता। अस्माकं भारतीय संस्कृतौ नारीणाम् उच्चस्थानं प्रकल्प्य मातृतुल्या: इति मत्वा तासां गुण:, महिमा च वर्ण्यते। सा जगज्जननी, विद्याया:, सम्पत्त: च अधष्ठात्री देवी इति पूजयाम: वयम्।

**' यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता: '।**

**' या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता '।**

इत्यादीनि वचांसि तासां नारीणां शक्तिं, महिमानं च वर्णयन्ति।

मानवाधिकारस्य सामाजिक समावेशनस्य च क्षेत्रं अत्यन्तविस्तृतं वर्तते। यतोऽहि तत्र मानवै: सह वृक्षा:, पशु-पक्षिण:, नद्य:, पर्वताश्च अन्तर्भवन्ति । मानवीय उच्चतम न्यायालय: स्व निर्णये स्पष्टमकरोत्, यत् अरावली पर्वत:, नद्य: च चेतना:(Animate), ते अपि सृष्टे: सजीवनायां, निरन्तरतायां च स्व योगदानं प्रदास्यन्ति । अत: मानवाधिकारेण सह एतेषाम् अधिकारे अपि दृष्टि: स्थापनीया वर्तते। **'माता भूमि:, पुत्रोऽहं पृथिव्या:'** इति वचसा अस्माकं वैदिकपरम्परा पूर्वमेव भूमिं मातृस्थाने विनियोज्य स्वयं पुत्रत्वेन परिगणिति। यजुर्वेदे **' नमो वृक्षेभ्य: नमो वन्याय औषधीनां पतये नम:'** इत्यक्त्वा

एतेषां कृते कृतज्ञता प्रकटिता वर्तते। ऋग्वेदस्य **'अरण्यानि सूक्ते'** वृक्षाणां नाशः न कर्तव्यः इत्युक्तम्। **'अरण्यानि न वै हन्ति'** । अद्य यत् Wildlife preservation इत्युच्यते तत् वेदेषु पूर्वमेव प्रकटितमासीत्। अथर्ववेदे मानवस्य - पशुपक्षीणां सह निवासेन एव सन्तुलनम् आयाति इति अभिप्रायः दृश्यते यथा –

**"सं सं स्रवन्तु पशवः समश्वा समु पुरुषाः ।**

**सं धान्यस्य या स्फातिः संस्राप्येव हविषा जुहोषि ॥" ( अथर्व – 2.26.3)**

अर्थात् काकः,शृगालः, पक्षिणः इत्यादि जन्तवः क्रिमयः च मृतशरीरं, दुर्गन्धयुक्त पदार्थान् च सादित्वा प्रकृतेः प्रदूषणम्, वायोः प्रदूषणं च निवारयन्ति ।

ऋग्वेदे शुद्धजलम् अमृतमित्युक्तम् – **'अप्स्वन्तस्मृत्य अप्सु भेषजम्'** । इत्यादयः नैके उद्धरणाः वेदेषु उपलभ्यन्ते। एतेषु सर्वेष्वपि मानवस्य पशुपक्षिणाम्,प्रकृतेः च सजीवसम्बन्धः प्रकटीक्रियते। आदिकाव्यस्य रामायणस्य कर्त्रा महर्षिणा वाल्मीकिना क्रौञ्चयुगलस्य वधं दृष्ट्वा एव **'मा निषाद ! प्रतिष्ठां त्वगमः शाश्वतीः समाः'** इति प्रथमं काव्यवाक्यं निर्मितम्। लौकिककव्यानां रचना वाल्मीकेः अनेन श्लोकेनेव आरब्धा इति अङ्गीक्रियते। महाकवेः कालिदासस्य 'अभिज्ञानशाकुन्तलम्' नाटके अपि प्रकृतेः, पशुपक्षिणां पारिवारिक सम्बन्धः सुन्दरतया निरूपितं दृश्यते । शकुन्तला वृक्षेभ्यः, सस्येभ्यः जलसिञ्चनात् परमेव स्वयं जलं पिबति स्म । तेषु पुष्पविकसिते, किसलयसमुद्भूते सति उत्सवमेव आचरति स्म। तस्य हरिणस्य वृणे जाते, तस्य निवारणार्थं इङ्गुदीतैलं लेपयति स्म । पतिगृह्गमनवेलायां पशुपक्षिणां, वृक्षाणां च अनुमतिं स्वीकरोति। प्रकृतिः, पशुपक्षिणः अपि शकुन्तलायाः गमनसमये रुदन्ति, दुःखं प्राप्नुवन्ति। एवं प्रकृतेः शकुन्तलायाश्च सम्बन्द्धः भावपूर्णः आसीत् । भवभूतेः उत्तररामचरिते अपि प्रकृतेः पुरस्तात् सीतारामौ स्व दुःखानि उक्त्वा अश्रुपातं कुर्वन्तौ दृश्येते। रघुवंशकाव्ये राज्ञः दिलीपस्य गोसेवा, मेघदूते मेघं सहोदरत्वेन परिकलप्य पत्न्यै तेन द्वारा सन्देशप्रेषणम् इत्यादि दृष्टान्तेषु ऋषयः, कवयः प्रकृतिं चेतनत्वेन स्वीकृत्य मानव-प्रकृतेः सः अस्तित्व स्वीकारं कृतवन्तः। अस्माकं पूर्वजाः वैदिक ऋषयः, लौकिक कवयश्च प्रकृतेः सत्तां सम्मान्य, प्राकृतिक अवयवानाम् अनुकूलतामेव सुखत्वेन अङ्यकुर्वन्। सुखाय- उत्तमजीवनाय च मनुष्यस्य प्रकृतेः परस्पर आनुकूल्यम् अत्यावश्यकम् ।

महाकवेः कालिदासस्य ऋतुसंहाराख्ये नाटके षट्सु सर्गेषु ग्रीष्मतः आरभ्य वसन्त ऋतु पर्यन्तं षण्णाम् ऋतूनां सुन्दरं वर्णनं वर्तते । प्रत्येकस्मिन ऋतौ प्रकृतौ कीदृशपरिवर्तनानि भवन्ति इति प्रकृतिवर्णनेन सह तेषु ऋतुषु जगति कीदृश परिवर्तनानि भवन्ति, युवक-युवतीनाम्, प्रेमिणाम्, प्रणयजीवने कथं परिवर्तनमायाति इत्यादि विचाराणामपि सुन्दरं चित्रणं अविनाश प्रदत्तं दृश्यते । प्रत्येकसर्गस्यान्तेऽपि एकैकस्य ऋतोः वर्णनात्मकम् एकं पद्यम् तस्मिन् पद्ये सर्वेषां जनानां मङ्गलार्थम् अभ्यर्थना अपि कृता वर्तते । यदि साम्प्रतम् एतादृश सन्देशान्, प्रकृतेः महत्वं च सर्वेभ्यः वयं बोधयामः चेत् सर्वत्र मङ्गलं जाते । मानवकुलस्य प्रकृतेः प्राणिपक्षिणां च सहजीवनं सुन्दरतया सिध्यति।

अतः निष्कर्षता वक्तुं शक्यते यत् अस्माकं लौकिके वैदिके च वाङ्मये मानवीयमूल्यानां शृंखला एव उपलभ्यते । मानवस्य पुरातनपरमपरया, संस्कृत्या च विच्छेदः जातः, अतः एव अद्य 'Human rightsand inclusion' इति विचारः आरब्धः । अत्र स्वामी दयानन्द सरस्वती वर्याणां वचनों स्मर्यते । 'वेदों की ओर लौटे' अर्थात् 'वेदमार्गे आगच्छन्तु' इति । तद्वत् इदानीम् अस्माभिः वेदानाम्, उपनिषदाम्, गीतायाः, संस्कृतसाहित्यानां मार्गे गन्तव्यम् । मानवीयमूल्यानां महत्वम् अवगम्य जीवने आत्मसात्करणीयम् । यदि मानवीयमूल्यानां ज्ञानं सम्यक् भवति चेत् वयं मानवाधिकारे समाजिक समावेशने च स्व उद्देश्यं प्राप्तुं शक्नुमः । यतोऽहि अस्माकं भारतीय संस्कृतेः उद्घोषः **'वसुधैव कुटुम्बकम्', 'सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः, सर्वे भद्राणि पश्यन्तु, मा कश्चित् दुःख भाग् भवेत् '** आदयः प्राणीनां पक्षिणां सर्वेषां चेतनानां समावेशनस्य

महत्वं प्रतिपादयन्ति। अस्माकं संस्कृति: दायित्वेषु बदन ददाति। अत: यदि प्रत्येकं मानव: स्व दायित्वं सम्यक् साधयति चेत् सर्वेषां कल्याणं भवति, वयमपि मानवाधिकाराणां प्राप्तौ सक्षमा: भवाम:।

सन्दर्भ–


1. आस्ट्रेलियाई सामाजिक समावेशन बोर्ड। आस्ट्रेलिया में सामाजिक समावेशन: आस्ट्रेलिया कैसे आगे बढ़ रहा है। http//www.socialinclusion.gov.au/resources/how-australia'isfaring.
2. UNESCO । सदस्य राज्यों के साथ महानिदेशक का परामर्श। सामाजिक समावेश, सामाजिक परिवर्तन, सामाजिक नवाचार: 2014-2021 में यूनेस्को की क्या भूमिका है? 23 नवम्बर 2012
3. ईशावास्योपनिषद्।
4. ईशावस्यमिदं सर्व यद् किञ्च जगत्यां जगत्।
5. तेन त्यक्तेन भुञ्जीथा मा गृध: कस्य स्विद् धनम्।। ईशो0 1
6. कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समा:।
7. एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे।। ईशो0 2
8. यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति।
9. सर्वभूतेषु चात्मान ततो न विजुगुप्सते।। ईशो0 6
10. कठो0 1.1.2
11. श्वोभावा मत्र्यस्य यदन्तकैतत्सर्वेन्द्रियाणां जरयन्ति तेज:।
12. अपि सर्वं जीवितमल्पमेव तवैव वाहास्तव नृत्यगीते।। कठो0 1.1.26
13. न वित्तेन तर्पणीयो मनुष्यो लप्स्यामहे वित्तमद्राक्ष्म चेत्वा।
14. जीविष्यामों यावदीशिष्यसि त्वं वरस्तु मे वरणीय: स एव।। वही0 1.1.27
15. सत्येन लभ्यस्तपसा ह्येष आत्मा सम्यग्ज्ञानेन ब्रह्मचर्येण नित्यम्।
16. अन्त: शरीरे ज्योतिर्मयों हिं शुभ्रो यं पश्यन्ति यतय: क्षीणदोषा:।–मुण्डको0 3.1.5
17. सत्यमेव जयते नानृतं सत्येन पन्था वितो देवयान:।
18. येनाक्रमन्यृषयो ह्याप्तकामा यत्र तत्सत्यस्य परमं निधानम्।। वही0 3.1.6
19. सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमद:। आचार्याय प्रियं धनमाहत्य प्रजातन्तुं मा व्यवच्छेत्सी:। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। तैत्तिरीयो0 शिक्षावल्ली. 11
20. यान्यनवद्यानि कर्माणि। तानि सेवितव्यानि। नो इतराणि। यान्यस्माकँ सुचरितानि। तानि त्वयोपास्यानि। नों इतराणि।........हिया भिया देयम्। संविदा देयम्। वही0 शिक्षावल्ली.11
21. तदेतत् त्रयं शिक्षेत दमं दानं दयामिति। बृहदारण्यको0 5.1
22. त्रयो धर्मस्कन्धा यज्ञोऽध्ययनं दानमिति।' छान्दोग्यो0 2.23.1